अथ छयतोरधिकारः

1137. **प्राक्क्रीताच्छः (5-1-1) ॥अधिकारसूत्रम् ॥**

तेन क्रीतम् (1144) इत्यतः प्राक् छोऽधिक्रियते।

1138. **उगवादिभ्यो यत् (5-1-2) ॥अधिकारसूत्रम् ॥**

प्राक् क्रीतादित्येव। **उवर्णान्ताद् गवादिभ्यश्च यत् स्यात्।** छस्यापवादः। शङ्कवे हितं शङ्कव्यं दारु। गव्यम्।

वा. नाभि नभञ्च । नभ्यः अक्षः। नभ्यम् अञ्ज नम्।

1137. **प्राक्क्रीतादिति** – तेन क्रीतमिति सूत्रं वक्ष्यते, ततः पूर्वं येषु सूत्रेषु अथनिर्देशोऽस्ति, न तु प्रत्ययनिर्देशः तत्र छः स्यादित्यर्थः।

1138. **उगवादिभ्य इति** – उगवादिभ्यः, यत् इतिच्छेदः। गोशब्दः आर्दियेषां ते गवादयः, तद्गुणसंविज्ञानबहुव्रीहिः। उश्च गवादयश्च उगवादयः, तेभ्यः = उगवादिभ्यः। इतरेतरद्वन्द्वः। **'तेन क्रीतम्' इत्यर्थे उवर्णान्ताद् गवादिगणपठित-शब्देभ्यः च यत्प्रत्ययो भवतीत्याशयः।** पूर्वोक्त-छप्रत्ययस्यापवादः। यथा शङ्कव्यम्। गव्यम्। गवादिगणो यथा-गो। हविस्। अक्षर। विष। बर्हिस्। अष्टका (इष्टका इति प्रक्रियासर्वस्वे)। स्खदा (स्खद इति काशिकायाम्) युग। मेधा। स्रुच् (स्रज् इति काशिकायाम्)। नाभि नभं च (गणसूत्रम्)। शुनः सम्प्रसारणं वा च दीर्घत्वं तत्सन्नियोगेन चान्तोदात्तत्वम् (गणसूत्रम्)। ऊधसो नङ् च (गणसूत्रम्)। कूप। खद (खट इति काशिकायाम्)। दर (उदर इति काशिकायाम्)। खर। असुर। अध्वन्। क्षर। वेद। बीज। दीप्त (दसि)। स्कद।

रूपसिद्धिः

शङ्कव्यम् – शङ्कवे हितम् इत्यर्थे (शङ्कु = कीली = खूँटी के लिय उपयोगी इति भाषायाम्) 'शङ्कु ङे' इत्यस्मात् छप्रत्ययं प्रबाध्य ''उगवादिभ्यो यत्'' इति यत्प्रत्ययेऽनुबन्धलोपे शङ्कु ङे य इति जाते, प्रातिपदिकत्वात् सुब्लुकि, ''ओर्गुणः'' इति ओकारे गुणे शङ्को य इति जाते, ''वान्तो यि प्रत्यये'' इति ओकारस्य अवादेशे, स्वादिकार्ये 'शङ्कव्यम्' इति रूपं सिद्धम्।

गव्यम् – गोभ्य हितम् इत्यर्थे 'गो भ्यस्' इत्यस्मात् ''तस्मै हितम्'' इति छप्रत्ययं प्रबाध्य ''उगवादिभ्यो यत्'' इति यत्-प्रत्ययेऽनुबन्धलोपे, सुब्लुकि, ''वान्तो यि प्रत्यये'' इति ओकारस्य अवादेशे, स्वादिकार्ये 'गव्यम्' इति रूपं सिद्धम्।

वा. नाभि नभमिति – नाभि, नभम्, च इतिच्छेदः। **यत्प्रत्यये क्रियमाणे नाभिशब्दस्य 'नभ' इत्यादेशः भवति।** यथा नभ्योऽक्षः। नभ्यम् अञ्ज नम् रथादिनाभेः एव गवादिगणे पाठः। शरीरस्थ नाभये हितं 'नाभ्यम्' इति उच्यते।

रूपसिद्धिः

नभ्योऽक्षः – नाभये हित इत्यर्थे (रथचक्रस्य नाभये हितकरः दण्डः), 'नाभि ङे' इत्यस्मात् 'प्राक्क्रीताच्छः' इति छप्रत्ययं प्रबाध्य ''उगवादिभ्यो यत्'' इति यत्प्रत्ययेऽनुबन्धलोपे ''नाभि नभञ्च'' इति गणसूत्रेण नाभि इत्यस्य नभादेशे नभ य इति जाते, भत्वादकारलोपे, स्वादिकार्ये 'नभ्यः' इति रूपं सिद्धम्।

नभ्यम् अञ्ज नम् (तैल सिञ्च नम्) नाभये हितम् इत्यर्थे छं प्रबाध्य यत्प्रत्ययेऽनुबन्धलोपे, नाभेः नभादेशे, भत्वादकारलोपे, स्वादिकार्ये 'नभ्यम्' इति रूपं सिद्धम्।

उवर्णान्तानामन्योदाहरणानि –

सक्तुभ्यः हिताः सक्तव्याः धानाः। कमण्डलवे हिताः कमण्डलव्या मृत्। पिचवे (पिचु = रुई इति भाषायाम्) हितः पिचव्यः कर्पासः। परशवे हितं परशव्यम् अयः (लोहः)। चरुभ्यो हिताः चरव्याः (तण्डुलाः) इत्यादयः।

गवादिगणस्यान्योदाहरणानि –

हविषे हितं हविष्यम् आज्यम्। मेधायै हितं मेध्यं चूर्णम्। अध्वने हितम् अध्वन्यं मोदकम्। शुने हितं शुन्यं शून्यं वा एकान्तस्थानम् (श्वन् य इत्यवस्थायां 'शुनः सम्प्रसारण वा च दीर्घत्वम्' इति वस्य उत्वे, पूर्वरूपे, वा दीर्घे च कृते शून्य शुन्यञ्चेति सिध्यतः)। स्रुचे हितं स्रुच्यं काष्ठम् (स्रुच् = स्रुवा) इत्यादयः।

1139. **तस्मै हितम्(5-1-5) ॥विधिसूत्रम् ॥** वत्सेभ्यो हितो वत्सीयो गोधुक्।
1140. **शरीरावयवाद्यत्(5-1-6) ॥विधिसूत्रम् ॥** दन्त्यम्। कण्ठ्यम्। नस्यम्।
1141. **आत्मन्-विश्वजन-भोगोत्तरपदात्खः(5-1-9) ॥विधिसूत्रम् ॥**
1142. **आत्माध्वानौ खे(6-4-169) ॥विधिसूत्रम् ॥**
एतौ खे प्रकृत्या स्तः। आत्मने हितम् आत्मनीनम्। विश्वजनीनम्। मातृभोगीणः।

1139. **तस्मै हितम् इति** - तस्मै, हितम् इतिच्छेदः। **चतुर्थीसमर्थाद् हितम् इत्यर्थे छप्रत्ययः स्यादित्यर्थः।** यथा वत्सीयः। उगवादिभ्य यदेव भविष्यति।

रूपसिद्धिः

वत्सीयः - वत्सेभ्यो हितः (गोधुक् = ग्वाला) इत्यर्थे 'वत्स भ्यस्' इत्यस्मात् ''तस्मै हितम्'' इति छप्रत्यये, प्रातिपदिकत्वात्सुपो लुकि, ''आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्'' इति छस्य ईय् इत्यादेशे (छ् - ईय्), भत्वादकारलोपे, स्वादिकार्ये 'वत्सीयः' इति रूपं सिद्धम्। अन्योदाहरणानि यथा - करभेभ्यो हितः करभीयः उष्ट्रः। मात्रे हितो मात्रीयः पुत्रः। पित्रे हितः पित्रीयः पुत्रः। इत्यादयः।

1140. **शरीरावयवादिति** - शरीरावयवात्, यत् इतिच्छेदः। शरीरस्य अवयवः शरीरावयवः, तस्मात् = शरीरावयवात्। षष्ठीतत्पुरुषः। चतुर्थ्यन्तात् शरीरावयवाद् हितमित्यर्थे यत्प्रत्ययः स्यादित्यर्थः। यथा दन्त्यम् इत्यादि।

रूपसिद्धिः

दन्त्यम् - दन्तेभ्यो हितम् इत्यर्थे (दन्तफेनादिकम्) 'दन्त भ्यस्' इत्यस्मात् ''शरीरावयवाद्यत्'' इति यत्प्रत्ययेऽनुबन्धलोपे, सुब्लुकि, भत्वादकारलोपे, स्वादिकार्ये 'दन्त्यम्' इति रूपं सिद्धम्।

कण्ठ्यम् - कण्ठाय हितम् इत्यर्थे 'कण्ठ ङे' इत्यस्मात् यत्प्रत्ययेऽनुबन्धलोपे, सुब्लुकि, भत्वादकारलोपे, स्वादिकार्ये 'कण्ठ्यम्' इति रूपं सिद्धम्।

नस्यम् - नासिकायै हितम् इत्यर्थे 'नासिका ङे' इत्यस्मात् यत्प्रत्यये, अनुबन्धलोपे, सुब्लुकि ''नस् नासिकाया यत्-तस्-क्षुद्रेषु''इ तिव ार्तिकेन' नासिका'इ त्यस्य' नस्'इ त्यादेशे,स् वादिकार्ये' नस्यम्'इ तिरू पं सिद्धम्।ए वमेव ओष्ठाभ्यां हितम् ओष्ठ्यम्, चक्षुर्भ्यां हितं चक्षुष्यम्, नाभये हितं नाभ्यम्, मूर्ध्ने हितं मूर्धन्यम् इत्यादयोऽपि बोद्धव्याः।

1141. **आत्मन्-विश्वजनेति** - आत्मन्-विश्वजन-भोगोत्तरपदात्, ख इतिच्छेदः। भोगः (भोगशब्दः) उत्तरपदं यस्य स भोगोत्तरपदः, बहुव्रीहिसमासः। आत्मा च विश्वजनश्च भोगोत्तरपदश्चैषां समाहारः - आत्मन्-विश्वजन-भोगोत्तरपदम्, तस्मात् = आत्मन्-विश्वजन-भोगोत्तरपदात्, समाहारद्वन्द्वः। **चतुर्थ्यन्ताद् हितम् इत्यर्थे आत्मन्-विश्वजन इत्याभ्यां शब्दाभ्यां भोगोत्तरपदाच्च खप्रत्ययः स्यादित्यर्थः।** इदं सूत्रम् औत्सर्गिक-छप्रत्ययस्यापवादः।

1442. **आत्माध्वानाविति**- आत्माध्वानौ खे, इतिच्छेदः। आत्मा च अध्वौ च, तौ आत्माध्वानौ, इतरेतरद्वन्द्वः। **आत्मन् अध्वन् इत्येतयोः शब्दयोः प्रकृतिभावः स्यात् खे परे इत्यर्थः।**

रूपसिद्धिः

आत्मनीनम् - आत्मने हितम् इत्यर्थे 'आत्मन् ङे' इत्यस्मात् ''आत्मन्-विश्वजन-भोगोत्तरपदात्खः'' इति खप्रत्यये, सुब्लुकि, ''आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्'' इति खस्य ईनादेशे (ख् - ईन्), ''यचि भम्'' इति भसञ्ज्ञायां, ''नस्तद्धिते'' इति टि (अन्) लोपे प्राप्ते, ''आत्माध्वानौ खे'' इति प्रकृतिभावे, स्वादिकार्ये 'आत्मनीनम्' इति रूपं सिद्धम्।

विश्वजनीनम् - विश्वे जनाः - विश्वजनाः, कर्मधारयः। विश्वजनेभ्यो हितम् इत्यर्थे 'विश्वजन भ्यस्' इत्यस्मात् खप्रत्यये, सुब्लुकि, खस्य ईनादेशे, भत्वादकारलोपे, स्वादिकार्ये 'विश्वजनीनम्' इति रूपं सिद्धम्।

मातृभोगीणः - मातुर्भोगः (शरीरम्) = मातृभोगः, षष्ठीतत्पुरुषः। मातृभोगाय हितः (आहारः) इत्यर्थे 'मातृभोग ङे' इत्यस्मात् खप्रत्यये, सुब्लुकि, खस्य ईनादेशे मातृभोग ईन् अ इति जाते, भत्वादकारलोपे, ''अट्कुप्वाङ्नुम्व्यवायेऽपि'' इति नस्य णत्वे, स्वादिकार्ये 'मातृभोगीणः' इति रूपं सिद्धम्। एवमेव पितृभोगीणः, राजभोगीनः, आचार्यभोगीनः, स्वभोगीनः इत्यादयोऽपि बोद्धव्याः।

अभ्यासः

वस्तुनिष्ठात्मकप्रश्नाः –

1. उगवादिभ्यः प्रत्ययो भवति –

(क)	छ	(ख)	यत्
(ग)	ख	(घ)	सर्वे

2. शुने हितं भवति –

(क)	शुन्यम्	(ख)	शून्यम्
(ग)	कखौ	(घ)	कोऽपि न

3. आत्मनीनम् इत्यत्र प्रत्ययोऽस्ति –

(क)	ईन	(ख)	ख
(ग)	कखौ	(घ)	कोऽपि न

अतिलघूत्तरात्मकप्रश्नाः –

4. तेन क्रीतम् इत्यतः प्राक् कोऽधिक्रियते?
5. उवर्णान्तात् गवादिभ्यश्च कः प्रत्ययः?
6. उगवादिभ्यो यदिति कस्यापवादः?
7. नभ्यम् इत्यत्र प्रकृतिप्रत्ययौ कौ?
8. दन्तेभ्यः हितम् उच्यते –

लघूत्तरात्मकप्रश्नाः –

9. आत्मनिति सूत्रं प्रपूर्य सोदाहरणामर्थं लिखत।
10. उगवादिभ्यो यत् इति सूत्रं सोदाहरणं व्याख्यायताम्।
11. शरीरावयवाद्यत् इति सूत्रार्थं सोदाहरणं लिखत।

निबन्धात्मकप्रश्नाः –

12. अधोलिखितपदानां ससूत्र सिद्धिः कार्या।
    शङ्कव्यम्, गव्यम्, नभ्यः, वत्सीयः, कण्ठ्यम्, नस्यम्, मातृभोगीणः
13. अधोलिखितसूत्राणां व्याख्या कार्या।
    प्राक्क्रीताच्छः, तस्मै हितम्, आत्माध्वानौ खे
14. प्रकरणस्थसूत्राणां पूर्ववत् अर्थोदाहरणसहिता सारणी लेखनीया।